National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 395-398
© 2026 NJHSR
www.sanskritarticle.com

**सङ्गीता मण्डल**
शोधच्छात्रा, शिक्षाविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**सङ्गीता मण्डल**
शोधच्छात्रा, शिक्षाविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# भारतीयज्ञानपरम्पराधारेण व्यक्तित्वनिरूपणम्

**सङ्गीता मण्डल**

**सारांशः**
प्राचीनभारतीयसंस्कृतेः शिक्षापरम्परा वेदोपनिषद्पुराणेतिहाससमन्विता आसीत् या मानवसमाजमानवव्यवहार-मानवगुणानां पराकाष्ठां प्रदर्शयति। साम्प्रतिक-शिक्षाक्षेत्रेऽपि मनोवैज्ञानिकविचारधारा मानवानां प्राचीनार्वाचीनशिक्षापरम्परयोः समानं महत्त्वं विवृणोति। अतः मनोविज्ञानमेतद् मानवव्यवहारस्य विज्ञानमस्ति यत् मानवानां सर्वेषां पक्षाणामम् अध्ययनं करोति। अतः प्राच्यपाश्चात्यशिक्षा-विद्भिः मनोविज्ञानिभिश्च निगद्यते यत् सुप्राचीनकालादेव अलौकिकपुरुषाः, तपस्विनः, मनस्विनश्च मानवव्यवहारान् अध्येतुं मनोविज्ञानस्य शरणं गच्छन्ति, यतोहि मानवव्यवहाराणां सङ्घटनात्मकं रूपं भवति मनोविज्ञानम्। व्यक्तित्वं न केवलं शारीरक-मानसिकगुणानां समष्टिरूपं भवति, अपि च अनेकेषां गुणानाम् अर्थात् शारीरक-मानसिक-भाषिक-व्यावहारिक-सामाजिक-नैतिक-आध्यात्मिकगुणानां समष्टिरूपं व्यक्तित्वं भवतीति निरूपयति ।

**कूटः- भारतीयज्ञानपरम्परा, व्यक्तित्वम्, वेदेषु व्यक्तित्वम्, वेदान्तदर्शने व्यक्तित्वम्, न्यायदर्शने व्यक्तित्वम्, साहित्ये व्यक्तित्वम्,।**

**भारतीयज्ञानपरम्परा**

भारतीयज्ञानपरम्परा नाम भारतस्य सा सनातनी ज्ञानधारा अर्थात् प्राचीन साहित्य तथा वेदारभ्य उपनिषद्सु, दर्शनेषु साहित्येषु व्यवस्थितरूपेण प्रतिपादिता, गुरुपरम्परया च युगानुयुगं संरक्षिता वर्तते। भारतीयज्ञानपरम्परायाः मूलाधारः वेदाः सन्ति, ये मानवजीवनस्य अभ्युदयाय निःश्रेयसाय च मार्गदर्शनं कुर्वन्ति। उपनिषदः आत्मविद्यायाः ब्रह्मविद्यायाश्च स्वरूपं निरूपयन्ति, दर्शनशास्त्राणि तर्कयुक्त्या तत्त्वानां विवेचनं कुर्वन्ति, तथा विविधानि शास्त्राणि लौकिक-पारलौकिकयोः उभयोः क्षेत्रयोः मानवस्य कल्याणमार्गं प्रदर्शयन्ति। एषा परम्परा केवलं सैद्धान्तिकज्ञानस्य सङ्ग्रहः नास्ति, अपितु मानवजीवनस्य समग्रविकासाय निर्मिता जीवनपद्धतिरपि अस्ति। अस्यां परम्परायां धर्मः, दर्शनम्, अध्यात्मविद्या, आयुर्वेदः, योगशास्त्रम्, गणितम्, ज्योतिषशास्त्रम्, व्याकरणम्, नीतिशास्त्रम्, साहित्यं, कलाः, पर्यावरणचिन्तनं च समाहितानि सन्ति। अयं ज्ञानप्रवाहः सत्यस्य अन्वेषणं, नैतिकमूल्यानां संरक्षणं, प्रकृत्या सह सामञ्जस्यं, तथा लोककल्याणस्य भावनां च प्रोत्साहयति।

**व्यक्तित्वम्**

मनोविज्ञानदृष्ट्या 'व्यक्तित्वम्' इति शब्दः व्यापकार्थे स्वीक्रियते। आंग्ल-भाषायां "Personality" इति शब्दः व्यक्तेः बाह्यगुणान् आचारव्यवहारांश्च द्योतयति इत्यर्थः ।

वस्तुतः व्यक्तित्वं नैकेषां गुणानां समष्टिस्वरूपं वर्तते। परन्तु व्यक्तित्व-विषये पाश्चात्यमनोवैज्ञानिकैः भिन्नसिद्धान्ताः प्रतिपादिताः। तत्र हिप्पोक्रेटस्, क्रेश्मर्, शल्डन्, यूंगादयः शारीरिकसिद्धान्तान्, आल्पोर्ट, केटिल् इत्यादयः गुणसिद्धान्तान्, सिग्मण्ड फ्रायड मनोविश्लेषणसिद्धान्तञ्च प्रत्यपादयन्। अत्र सर्वेषु व्यक्तित्व-सिद्धान्तेषु गुणाः एव प्राधान्येन दृश्यन्ते। अत एव 'व्यक्तित्वं गुणानां समष्टिस्वरूपं वर्तते'

इति गिल्फोर्ड (Pesonality is an Integrated Pattern of Traits. - Guilford) परिभाषामलिखत्। एवमन्येषामपि परिभाषाणाम् अवलोकनेन ज्ञायते यत् व्यक्तित्वं नाम गुणानां राशिः वर्तते इति।
अत्र अस्मदीयाः भारतीयास्तु व्यक्तिव्यवहारं सत्त्वरजस्तमोगुणाः प्रभाव-यन्तीति आमनन्ति। अतः अचित् तमोगुणेन, अहं रजोगुणेन, अध्यहश्च सत्त्वगुणेन तोलयितुमलम्। न केवलं फ्रायिडेन निरूपितैः अचित्, अहं, अध्यहमित्येतैः त्रिगुणैः तोलयितुमलम्, अपि च अन्येषां सिद्धान्तेषु प्रतिपादितगुणैः सर्वैः सह सत्त्वरजस्त-मोगुणैः तेलयितुमलमिति मे भाति। सत्त्वादित्रिगुणविवर्धनेन व्यक्तेः शारीरिक-मानसिकपरिवर्तनानि जायन्ते इति मुक्षु वर्णयति भगवतीगीता।

**वेदेषु व्यक्तित्वम्**

**वयः सुपर्णा उपसेदुरिन्दं**

**प्रियमेधा ऋषयो नाधमानाः।[1]**

प्रचलमानस्य सूर्यस्य समीपे ये सूर्यकिरणाः गच्छन्ति, प्रसरन्ति वा, यज्ञेन प्रेमवताः किरणानां दर्शने समर्थाः, लोके विद्यमानानां प्रजानां प्रज्ञामापने सक्षमाः ऋषयः भवन्ति। सर्वद्रष्टारः / मन्त्रद्रष्टारः

**वैदिक-ऋषीणां व्यक्तित्वम् -**

राधीतरस्य - सत्यवाक्यता

पौरुशिष्टेः- तपस्सम्पन्नता

नाकस्य- स्वाध्यायप्रवचनता

त्रिशंकोः - आत्मसाक्षात्कारता

**स्त्रीव्यक्तित्वम्**

कद्रूश्च वै सुपर्णा चाऽत्मरूपयोरस्पर्धेति सा कद्रूः सुपर्णीमजयत् साऽब्रवीत् तृतीयस्याभितो दिवि सोमस्तमाहर तेनाऽऽत्मानं निष्क्रीणेष्वेतीयं वै कद्रूरसौ सुपर्णी छन्दांसि सौपर्णेयाः।[2]

कद्रुः सुपर्णा न सौन्दर्यविषये स्पर्धामकुरुताम्। तत्र कद्रुः सुपर्णीमजयत्। अस्माल्लोकात् तृतीयस्यां दिवि सोमः वर्तते। तं सोममानीय ददातु। तेन सोमाहरणेन आत्मानं निष्क्रीणीष्व इति या कद्रूः अब्रवीत्।

'सुपर्णोऽसि गरुत्मान् त्रिवृत्ते शिरो गायत्रं चक्षुः स्तोम आत्मा ज्ञायते तनूः वामदेव्यं बृहद्रथन्तरे पक्षौ यज्ञयज्ञियं पृच्छं छन्दाँस्थानि धिष्णिया शफाः यजूंषि नाम। सुपर्णेऽसि गरुत्मान् दिवं गच्छ सुपः पत'।

यद्यपि यजुर्वेदे व्यक्तीति शब्दस्य प्रयोगः कुत्रापि न मिलति, तथापि व्यक्तः, व्यक्तम् इति शब्दद्वयं लभ्यते। अत्र व्यक्तमिति शब्दस्य प्रसिद्धमित्यर्थः। व्यक्तः इति शब्दस्य विविधाभिः पुष्टिभिः प्रसिद्धिः इत्यर्थः। अनेन ज्ञायते यत् या अभिव्यज्यते सवकीयैः गुणैः सा व्यक्तिः तस्याः भावः व्यक्तित्वमिति सामान्यरूपेण परिभाषयितुं शक्नुमः।
अथर्ववेदे एकस्मिन् सूक्ते मानवीयशरीरसंरचनायाः तत्र आत्मतत्त्वस्य वासस्य देवादीनां स्थानानाञ्च विषये रहस्यमयं वर्णनं समुपलभ्यते

**उच्छिष्टे नाम रूपं चोच्छिष्टे लोक आहितः।**

**उच्छिष्ट इन्द्रश्चाग्निश्च विश्वमन्तः समाहितम्॥[3]**

अपि च -

**उच्छिष्टे द्यावापृथिवी विश्वं भूतं समाहितम्।**

**आपः समुद्र उच्छिष्टे चन्द्रमा वात आहितः॥[4]**

परब्रह्मणाः उच्छिष्टनामके शरीरे सर्वं विद्यते इति अथर्वसंहिता कथयति। सूक्तेऽस्मिन् विविधशारीरिकाङ्गानि चेष्टाः, अवस्थाः, शक्तयश्च विस्तरेण समीक्षिताः। प्राण-अपान-चक्षु-श्रोत्र-भौतिकाभौतिकशक्तयः व्यान उदान-वाणी-मनांसि च सर्वदा शरीरं सहकुर्वन्ति तेन सह चरन्ति च।

**प्राणापानौ चक्षुः श्रोत्रमक्षितिश्च क्षितिश्च या।**

**उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः॥[5]**

**मानवशरीरस्य अद्भुतरचना देवानां कार्यं विलक्षणमिति वेदः।**

**केन पार्ष्णी आभृते पुरुषस्य केन मासं संभृतं केन गुल्फौ।**

**केनाङ्गुलीः पेशनीः केन खानि केनोच्छलङ्ङ्खखो मध्यतः कः प्रतिष्ठाम्॥[6]**

शरीरस्य व्यक्तित्वे प्रभावमवगम्य स्थाने स्थाने अथर्ववेदे दीर्घायुसूक्तानि संरचितानि। शरीरं स्वस्थं भवेदेतदर्थं रोगनिवारणाय अपि प्रार्थना कृता।

अथर्ववेदानुसारं व्यक्तित्वनिर्धारिकेयं बुद्धिः मनुष्यस्य सामान्यक्षमता वा ग्रहणशक्तिरिति वर्तते। तर्कः, स्मृतिः, ज्ञानम् इत्यादयाः बुद्धेः धर्मास्सन्ति। इयं धारणा-शक्तिः अतः मेधा कथ्यते। एकस्मिन् मन्त्रे लुप्तोपमया अस्य सामर्थ्य चित्रितम्। तद्यथा

**त्वं नो मेधे प्रथमा गोभिरश्वेभिरा गहि।**

**त्वं सूर्यस्य रश्मिभिस्त्वं नो असि यज्ञिया॥[7]**

व्यक्तित्वस्य सर्वाङ्गीणविकासाय छात्रस्य बौद्धिकविकासोऽपि नितराम् आवश्यकः। एतदर्थं ब्रह्मचारीसूक्ते मनप्राणादिभिः सह मेधामपि प्रकटयितुं प्रार्थयते-

**प्राणापानौ जनयन्नाद व्यानं वाचं मनो हृदयं ब्रह्म मेधाय।[8]**

सायणाचार्येण मेधाशब्दः 'श्रुतधारणसामर्थ्यरूपिणी देवी' अपि 'आशु-विद्याग्रहणकुशलाबुद्धि' इतिरूपेण व्याख्यायितः। अथर्वसंहितायां बुद्धये व्यवहृताः शब्दाः मनीषा, धी, धीति च क्रमशः मननस्य ध्यानस्य धारणस्य च सामर्थ्यं प्रबोध-यन्ति। इयं बुद्धिः सामान्यात् अधिका भवति चेद् व्यक्तिं प्रभावयति सामान्यादल्पा भवति चेदपि प्रभावयति। यतोहि स्तरद्वये आत्मप्रत्ययो परिवर्त्यते।

**वेदान्तदर्शने व्यक्तित्वम्**

वेदास्तु संहितादिभिः विभक्ताः उपनिषत्पर्यवसायिनः सन्ति। वेदानाम् अन्तिमो भागो (उपनिषदः) वेदान्त इत्युच्यते। वोदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च' इति सदानन्दमुनिवरः कथयति।

मास्लोवर्यस्य आवश्यकतायाः सिद्धान्तानुसारमपि आत्मानुभूतिः मानवस्य अन्तिमलक्ष्यम् भवति। तथैव मानवस्य आध्यात्मिकविकासः व्यक्तित्वविकासस्य कश्चन पक्षः यश्च पूर्णतायै प्राप्यत्वेनाव-शिष्यते।

अर्वाचीनशिक्षाव्यवस्थायां व्यक्तित्वस्य आध्यात्मिकपक्षः वस्तुतः अत्यन्त-मुपेक्षितः। उपनिषदः तावत् आध्यात्मिकपक्षस्य एव बलं प्रयच्छन्ति।आध्यात्मिक-विकासेनैव (ब्रह्मज्ञानेनैव) पूर्णतां सम्पादयामः चेत् अन्यविधविकासः स्वयं भवतीति।

भारतीयाः व्यक्तित्वम् इति पदमाश्रित्य चिन्तनं यद्यपि न कृतवन्तः तथापि मानवगुणानां विषये अध्ययनं कृत्वा तद्विकासोपायान् अवश्यं प्रदर्शितवन्तः। वेदान्ते तु सत्वरजस्तमोगुणानामा-धारेण चतुर्विधं व्यक्तित्वम्, वर्णक्रमेण व्यक्तित्वस्य चातुर्विध्यं संस्कारसंस्कृतं व्यक्तित्वं प्रतिपादितम्।

बृहदारण्यकोपनिषदः प्रथमाध्याये चतुर्थब्राह्मणे वर्णोत्पत्तिप्रकरणं किञ्चि-द्विलक्षणमस्ति। ब्रह्म एकमेव आसीदित्यतः विभूतियुक्तं कार्यं कर्तुं देवतासु क्षत्रियानसृजत्। देवतासु क्षत्रियाः के इत्युक्ते इन्द्रवरुणसोमरुद्रयममृत्युरीशानाः इति श्रुतिः वदति। अतः क्षत्रियात् श्रेष्ठः अपरः नास्ति इत्येतत् राजसूयादिना ज्ञायते।

एवं चेदपि ब्रह्म विभूतियुक्तं कार्यं कर्तुं न शक्नोति स्म। अतः सः वैश्यम् असृजत्। वसवः रुद्राः आदित्याः विश्वदेवाः मरुतः इत्येते देवतासु वैश्याः भवन्ति।

तथापि ब्रह्म विभूतियुक्तं कार्यं कर्तुं न शक्नोति स्म। अतः सः शूद्रवर्णमसृजत्। पूषा शूद्रवर्णः भवति। एषा पृथिवी एव पूषा अस्ति। यतः एषा एव सर्वस्य पोषणं करोति।

**न्यायदर्शने व्यक्तित्वम्**

बालानां व्यक्तित्वविकासाय विद्यालयस्य भूमिका कथं इति न्यायदर्शने प्रतिपादितं वर्तते।

गुरुशिष्यसम्बन्धः व्यक्तित्वनिर्माणे प्रमुखं स्थानं बिभर्ति। न्यायदर्शनानुसारं गुरुः शिष्यं प्रति सर्वदा प्रेमभावं प्रदर्शयति। तदुक्तम् अन्नंभट्टेन तर्कसङ्ग्रहे

**निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।**
**बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः॥ इति।**

(तर्कसङ्ग्रहस्य मङ्गलश्लोकः)

अपि च न्यायरहस्ये गोविन्दभाट्टाचार्येण एवमुच्यते-

**प्रथमप्रवेशहेतोः अनधीतन्यायशास्त्राणाम्।**
**श्री गौतममुनिमतमतिसङ्क्षेपेणात्र लिख्यतेऽस्माभिः॥**

(न्यायरहस्यम्)

पुनश्च मुक्तावल्यां विश्वनाथेन कथ्यते-

**निजनिर्मितकारिकावलीमतिसंक्षिप्तचिरन्तनोक्तिभिः।**
**विशदीकरवाणि कोतुकान्ननुराजीवदयावशंवदः॥**

(मुक्तावली)

एवङ्कारं ग्रन्थकर्तृभिः मङ्गलाचरणवेलायां रचितपद्यस्य परामर्शन न्यायदर्शनानुसारं गुरुशिष्यसम्बन्धः व्यक्तित्वनिर्माणाय योग्यः आसीदिति ज्ञाप्यते।

**न्यायशास्त्रे व्यक्तित्वमापनतन्त्राणि**

व्यक्तित्वमापनाय न्यायशास्त्रस्य व्यक्तिनिरूपणम् उपकरोति। उक्तम् अन्नंभट्टेन 'यत्र यत्र धूमः तत्र तत्र वह्निरिति साहचर्यनियमः व्याप्तिः' (तर्कसंग्रहस्य व्याप्तिनिरूपणम्)। साहचर्यनियमो नाम एकस्मिन् अधिकरणे विद्यमानौ द्वौ धर्मौ। अनेन एष प्रसन्नः, एषः क्रुद्धः, एषः धूम्रपानं करोति, एषः मद्यपानं करोति इति व्यक्तेः व्यक्तित्वं निर्णेतुं शक्यते।

एवमेव हेत्वाभासोऽपि असद्धेतूनां निर्णये सहकरोति। यतोहि अहेतुः हेतुवदाभासते। अतः उक्तं पञ्चहेत्वाभासाः

**अनैकान्तोविरुद्धश्चाप्यसिद्धः प्रतिपक्षितः।**
**कालात्ययापदिष्टश्च हेत्वाभासाश्च पञ्चधा॥ इति।**

(मुक्तावली अनुमानखण्डः)

एवमेव स्वार्थानुमानं परार्थानुमानञ्च न्यायशास्त्रानुसारं व्यक्तित्व-मापन-तन्त्राणि भवन्ति।

**भगवद्गीतायाम् -**

**द्वौ भूतसंसर्गो लोकेऽस्मिन् दैव आसुर एव च।** (गीता 16.6)

देवाः -

**अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।**
**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ।।** (गीता -16.1-3)

आसुराः

**दम्भोदर्पाभिमानश्च क्रोधः पारुष्यमेव च।**
**अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ।।**

(गीता -16.4, 7-9, 11-13,18)

**भगवद्गीतायाम् अन्यत्र - स्वभाव-प्रभवगुणभेदैर्मनुष्याणां चतुर्धा विभागः कृतः ।**

**चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।।** गीता - 4.13)

**शमोदमस्तपः शोचं क्षान्तिरर्जवेमेव च।**
**ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ।।** (गीता- 18.42)

**शौर्यं तेजोवृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।**
**दानमीश्वरभावाश्च क्षात्रं कर्म स्वभावजम् ।।** (गीता - 18.43)

**कृषिगोरक्षवाणिज्यं वैश्यकर्मस्वभावजम् ।**
**परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ।।** (गीता -18.44)

**साहित्ये**

धीरोदात्त-धीतोद्धत-धीरललित-धारशान्ताः इति नायक-प्रकाराः, नायिकाप्रकाराश्च तेषां स्वभावादिभेदेन कृतः व्यक्तित्वप्रकार एवेति न विस्मरणीयम्।

**उपसंहारः**

शुद्धस्वरूपः आत्मा मनः पञ्चबूतानां संसर्गावसरे वात-पित्त-कफैः त्रिविध-दोषः प्रभावितः सन् सात्त्विक-राजस-तामसगुणान् प्राप्य तेषां न्यूनाधिक्यसंघर्षमेन प्रत्येकं आत्मनः चिन्तन-आचरणादिषु भेदः दृश्यते। तदेव व्यक्तित्वभेदत्वेन गृह्यते। तत्र समाजः, परिवारः इत्यादीनि सहकारिकाकाणि भवन्ति ।

**सहायकग्रन्थसूची**


1.मिश्रा, डॉ अन्नपूर्णा (2011) वैदिकवाङ्मय में राष्ट्रियैक्कता एवम् अखण्डता, परिमल पब्लिकेशन्स्, 22/3, शक्तिनगर, दिल्ली-110007

2.शास्त्री, प्रो. ज्ञानप्रकाश, (2009) यजुर्वेदपदार्थकोशः, परिमल पब्लिकेशन्स, 22/3 शक्तिनगर्, दिल्ली -07

3.वेदाश्रमी, श्रीवीरसेन, (2009) वैदिक सम्पदा, विजयकुमार गोविन्द राम हसाननद, 4408, नई सडक, दिल्ली-110006

4.लाल, डॉ. कृष्ण, (2009), वैदिक वाङ्मय विवेचन्, जे.पि. पब्लिषिंग हाउस, 27/28, शक्तिनगर, दिल्ली 110007

5.मिश्रः डा. लोकनाथ, 2004 आधुनिकं मनोविज्ञानम्, मृगाक्षी-प्रकाशनम्, लखनऊ।

6.डा. बि.पद्ममित्रश्रीनिवासः,2012,शिक्षायाः मनोवैज्ञानिका-धाराः, जगदीशसंस्कृतपुस्तकालयः, जयपुरम्।

7.गौतमः, न्यायदर्शनम्, चौखम्बा विद्याभवन्, वारणासि-1

8.प्रामाण्यवादः चौखम्बा सुरभारती प्रकाशन, वारणासि

9.तर्कसंग्रहः व्यासप्रकाशन, वारणासि

10.पि. नागमुनिरेड्डि, शिक्षामनोविज्ञानम्, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति

11.मंगल एस्. के., शिक्षमनोविज्ञान, PHI Learning Private Limited, New Delhi 110001

12.पण्डेय डा. राम शकल, शिक्षा मनोविज्ञान, आर लाल बुक डिपो, निकट गवर्नमेन्ट इन्टर कालेज, मेरठ 250001

13.Nyaya Philosophy - Dr. Arvind Kumar Jha, Standard pub, New Delhi.


**पाद टिप्पणी**

1 तै.ब्रा. 2-5-8-2

2 तै.सं. 6-1-6-1

3 अथर्ववेदः 11-8-1

4 अथर्ववेदः 11-8-2

5 अथर्ववेदः 11-9-25

6 अथर्ववेदः 10-2-5

7 अथर्ववेदः 6-108-1

8 अथर्ववेदः 11-5-24